# केन्द्रीयसंस्कृतविश्वविद्यालयः

## गुरुवायूर् परिसरः

## पुरनाट्टुकरा।

# 74 तमः गणतन्त्रदिनोत्सवः

(74TH REPUBLIC DAY)

## 26-01-2023

**कार्यक्रमप्रतिवेदनम्** –

प्रतिवर्षमिव ऐषमः शैक्षिकसत्रे अस्मिन् मुख्यकार्यालयपक्षतः 74तमः गणतन्त्रदिनोत्सवः पालनीय इति (दिनाङ्कः 19-01-2023, आदोशपत्रसंख्या के.सं.वि./कुलपति-016(ओएसडी)/2022-23/493) कश्चन आदेशपूर्वकसन्देशः प्राप्तः, यत्र आचरणीयानां कार्यक्रमविषयसूची च संयोजिता। तदनु परिसरनिदेशकः **प्रो.ललित कुमार साहु वर्यैः** काचित् समितिः निर्दिष्टा (दिनाङ्कः 19-01-2023,आदेशपत्रसंख्या – 311)। समितौ अस्यां शिक्षाशास्त्रविभागस्य सहायकाचार्यः **डाँ.डि.वोणुगोपालरावः समन्वयकरूपेण**, कार्यालयस्य कर्मचारी **श्री.वि.पि. विनीशः** सहायकरूपेण निश्चितौ। सुव्यवस्थितया, पूर्वापेक्षया च गणतन्त्रदिनोत्सवकार्यक्रमस्य निर्वहणाय परिसरनिदेशकैः **प्रो.ललित कुमार साहु वर्यैः** मार्गदर्शनं दत्वा रूपरेखा विवृता।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य **कुलपतिः प्रो. श्रीनिवास वरखेडी** महोदयैः प्रदत्तविशेषादेशानुगुणं, तथा गुरुवायूर्-परिसरस्यास्य निदेशकवर्याणां **प्रो.ललितकुमारसाहु** महोदयानां सूचनानुसारञ्च प्रातः सार्धाष्टवादने एव परिसरस्य सर्वविभागीयाः शिक्षकाः, छात्राश्च समुपस्थाय पताकावन्दनकार्यक्रमे भागभाजः अभूवन्। धर्मपालनं, कर्तव्यनिर्वहणम्, उत्तरदायित्वस्वीकरणम् इत्यद्यनेकानि मूल्यानि साम्प्रतिकसमाजे सर्वस्मिन् क्षेत्रे न दृश्यन्ते, विशिष्य अस्मत्परिसरे अपि विचारोयं, बहुत्र समस्यारूपेण अवलोक्यते इत्येवं कथयन्तः निदेशकवर्याः स्वसन्देशावसरे छात्राध्यापकान् सर्वानुद्दिश्य बोधितवन्तः यत् – सर्वे स्वधर्मपालकाः, कर्तव्यपरायणाः, उत्तरदायिनश्च भवेयुरिति। ततः सर्वे पताकावन्दनमकुर्वन्। पश्चात् आगतेभ्यः सर्वेभ्यः छात्रेभ्यः, शिक्षकेभ्यश्च मोदकानि प्रदत्तानि। अहमहमिकया आहत्य 250 संख्याकाः शैक्षिकजनाः उपस्थिताश्चाभूवन्।

प्रदत्तसूचनानुगुणं कुलपतिवर्याणाम् उपदेशश्रवणाय नूतनप्रेक्षागारे सर्वे यथासमयं नववादने एव उपस्थिताः। NEP2020 इति शिक्षानीतेः साफल्याय सर्वैरपि शिक्षकैः प्रयासाः करणीया इति कुलपतिवर्याणाम् उपदेशभाषणं समेषां कृते दिग्दर्शकमभूत्। तदनन्तरं शिक्षाशास्त्रविभागस्य छात्राध्यापकैः समायोजिताः, प्रदर्शिताश्च सांस्कृतिककार्यक्रमाः हृद्याश्चाभूवन्। कार्यक्रमस्यान्ते छात्रेभ्यः खाद्यं च प्रदत्तम्। इत्थं निश्चिते समये अतिमनोरञ्जकतया गणतन्त्रदिनोत्सवः अनुष्ठितो वर्तते।

शान्तिमन्त्रेण कार्यक्रमोऽयं सफलश्चाभवत्।


1. डा.डि. वेणुगोपालरावः - समन्वयकः
2. श्री. पि.वि. विनीशः - सहायकः


समन्वयकः — निदेशकः

डा. डि. वेणुगोपालरावः — प्रो. ललित कुमार साहु


केन्द्रीयसंस्कृतविश्वविद्यालयः
गुरुवायूर्-परिसरः
पुरनाट्टुकरा, तृश्शूर्, केरलम्
REPUBLIC DAY
REPUBLIC DAY
74 गणतन्त्रदिनोत्सवः-2023
दिनाङ्कः - 26-01-2023, समयः 8.30 AM ,स्थानम् - परिसरमैदानम् & कुलपतिभाषणं तथा सांस्कृतिककार्यक्रमाः - नूतनप्रेक्षागारः
संरक्षकः
प्रो. श्रीनिवास वरखेडी, कुलपतिः, के.सं.वि नवदेहली।
अध्यक्षः
प्रो. ललितकुमारसाहु निदेशकः, के.सं.वि गुरुवायूर्-परिसरः।
समयः
कार्यक्रमाः
8:30AM - परिसरे ध्वजारोहणम्, निदेशकानामुपदेशश्च।
9:00AM - कुलपतिवर्याणां सन्देशः
9:30AM - सांस्कृतिककार्यक्रमाः
।।मधुरवितरणञ्चान्ते।।
समन्वयकः - डा.डि. वेणुगोपालरावः
।।सर्वेषामुपस्थितिः कार्यक्रमशोभावर्धिनी।।
सहायकः - विनीशः पि. वि.



GPS Map Camera
Google
Puranattukara, Kerala, India
H545+5Q8, Puranattukara, Kerala 680553, India
Lat 10.555841°
Long 76.159518°
26/01/23 08:32 AM GMT +05:30


GPS Map Camera
Google
Puranattukara, Kerala, India
H545+5Q8, Puranattukara, Kerala 680553, India
Lat 10.555686°
Long 76.159082°
26/01/23 08:53 AM GMT +05:30


CENTRAL SANSKRIT UNIVERSITY
GPS Map Camera
Puranattukara, Kerala, India
H545+5Q8, Puranattukara, Kerala 680553, India
Lat 10.555798°
Long 76.159209°
26/01/23 09:36 AM GMT +05:30




GPS Map Camera
Google
Puranattukara, Kerala, India
H545+JMR, Puranattukara, Kerala 680553, India
Lat 10.556416°
Long 76.159064°
26/01/23 10:13 AM GMT +05:30


GPS Map Camera
Google
Puranattukara, Kerala, India
H545+JMR, Puranattukara, Kerala 680553, India
Lat 10.556416°
Long 76.159064°
26/01/23 10:35 AM GMT +05:30


GPS Map Camera
Google
Puranattukara, Kerala, India
H545+JMR, Puranattukara, Kerala 680553, India
Lat 10.556416°
Long 76.159064°
26/01/23 10:39 AM GMT +05:30